PAPER - 2

# MT

2017 .... .... 1200

Seat No. | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II**
**PAPER - II**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि द्वे कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

यदि ....... विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं ....... अधिकारः । (विक्रेता / ग्राहकः) (विक्रेतुः / ग्राहकस्य)

(ii) कः कं वदति ? १

वस्त्रस्यूतः मत्समीपे वर्तते ।

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

पर्यावरणरक्षणार्थं प्लास्टिकस्यूतानाम् उपयोगः करणीयः ।

मधुरा - कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः ।
माता - ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (१९७४) संवत्सरे स्थापिता एषा संस्था । 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चःग्राहकहितायैव बद्धपरिकरो वर्तते ।
द्वितीयः
शाकविक्रेता - यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय ।
माता - युक्तमुक्तं भवता ।
प्रथमः - (तोलयित्वा ददाति) गृह्णातु भवती । क्षम्यताम् ।
शाकविक्रेता
माता - कथं प्लास्टिकस्यूतं ददासि ? वस्त्रस्यूतः मत्समीपे वर्तते ।
मधुरा - पर्यावरणरक्षणार्थं प्लास्टिकस्यूतानामुपयोगः न करणीयः । विधिनापि तेषामुपयोजनं निषिद्धमस्ति ।
माता - समीचीनं, जाते, एवं सदैव अवहितचित्ता भव ।

**२. स्वमतप्रकटनम् ।**

ग्राहकाणाम् अधिकारविषये ३० / ४० शब्दपरिमितं संज्ञापनं माध्यमभाषया लिखत । २

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि द्वे कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

कबड्डी एतां .......... क्रीडां वैश्विकस्तरं नेतुं .......... एव प्रथमप्रयासः कृतः ।

(वैयक्तिकीं / साङ्घिकीं) (भारतदेशेन / महाराष्ट्रेण)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

कस्यां स्पर्धायां भारतदेशेन सुवर्णपदकं विजितम् ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

अधुना केवलं भारतदेशे कबड्डी एषा क्रीडा क्रीड्यते ।

स्वातन्त्र्यपूर्वकालादेव क्रीडामेतां वैश्विकस्तरं नेतुं प्रथमप्रयासः कृतः महाराष्ट्रेणैव । शून्यपञ्चनवैकतमे - (१९५०) ख्रिस्ताब्दे अखिल-भारतीय-कबड्डी-सङ्घटनायाः स्थापना समजायत । भारतीय ऑलिम्पिक-क्रीडासमित्या अष्टपञ्चनवैक (१९५८) तमे ख्रिस्तवर्षे एषः क्रीडाप्रकारः ऑलिम्पिक वैश्विक-क्रीडास्पर्धासु निवेशितः । शून्यनवनवैक (१९९०) तमे संवत्सरे बीजिङ्गनगरे आयोजितायाम् ऑलिम्पिक-स्पर्धायां चीनदेशेनापि एषा क्रीडा स्वीकृता। तदनन्तरं कबड्डीक्रीडायाः सुवर्णयुगमेवावतरितम्। बीजिङ्गनगरे समायोजितायाम् ऑलिम्पिकस्पर्धायां भारतदेशेन सुवर्णपदकं विजितम्, कबड्डीक्रीडायामेव। अनेन सुवर्णपदकेन आशियाई-स्पर्धायाः कबड्डीक्रीडायां सातत्येन त्रिवारं सुवर्णपदकं प्राप्य विश्वविक्रमः प्रस्थापितो भारतदेशेन। अधुना भारतदेशे तथैव जपान-पाकिस्तानादिषु आशियादेशेषु एषा क्रीडा क्रीड्यते, एवमेषा लोकप्रियापि सञ्जाता ।

**२. पृथक्करणम् ।** २

| | | | | | | |
|---|---|---|---|---|---|---|
| | → | | → | | → | |

(कबड्डीसङ्घटनायाः स्थापना, चीनदेशेन कबड्डीक्रीडायाः स्वीकारः, ऑलिम्पिक - वैश्विकक्रीडास्पर्धासु प्रवेशः, कबड्डीक्रीडायाः सुवर्णकालः)

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

१) समीपे, दूरे, निकषा, निकटे ।

२) रुग्णः, भिषक्, रोगी, अस्वस्थः ।

(ii) विशेषण-विशेष्य - अन्वितिः । (मेलनं कुरुत ।) १

| विशेषण | विशेष्य |
|---|---|
| द्वितीये | युवानौ |
| द्वौ | दिने |
| | द्वितीयम् |

(iii) गद्यांशात् चित्वा द्वे षष्ठी विभक्त्यन्तपदे लिखत । १

आसीत् पुरा सुविख्यातो नागार्जुनो नाम रसायनशास्त्रज्ञः चिकित्सकश्च । तस्य सेवाव्रतिनः कीर्तिः देशविदेशेषु प्रसृता । एकदा राजानं गत्वा नागार्जुनः प्रार्थयामास, ''महाराज, कार्यबाहुल्याद् मत्कृते सहायकस्य आवश्यकता वर्तते ।'' एतच्छ्रुत्वा द्वितीये दिने एव तं प्रति महाराजः द्वौ युवानौ प्रेषितवान् । तौ परीक्षितुं नागार्जुनः उभाभ्यामपि एकैकं वस्तु दत्त्वा अवदत्, ''इदं गृहीत्वा स्वगृहं गच्छतम् । श्वः तस्मात् किमपि रसायनम् औषधं वा निर्मीय आनयतमिति ।'' अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ । तदा तयोरेकः उक्तवान्, ''महाशय, अहं रसायनं कृत्वा आनीतवान् । पश्यतु भवानिति ।'' द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं, ''कथमिदानीम् अभाषमाणः तिष्ठसि ? किं त्वया नानीतं रसायनम् ?'' तदाकर्ण्य स मन्दस्वरेण अगदत्, ''आचार्य, ह्यः गच्छन्तौ पथि आवामेकं रुग्णमपश्याव । तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान् । तस्य समीपे स्थित्वा सेवां कृतवान् । अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति ।''

२. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) 'इदं गृहीत्वा स्वगृहं गच्छतम्' इति नागार्जुनः युवानौ अवदत् ।

(ii) महाराजः द्वौ युवानौ प्रेषितवान् ।

(iii) नागार्जुनः राजानं गत्वा प्रार्थयत ।

(iv) द्वितीयः युवा रुग्णस्य समीपे स्थित्वा सेवां कृतवान् ।

**द्वितीयः विभागः - पद्यम् ।**

**प्र.२ अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

अकायश्चाल्पसारश्च वेतसः कूलजश्च वः ।
अवज्ञया वा नानीतः किं च वा तेन वः कृतम् ॥१॥
तिष्ठन्त्येते यथास्थानं नगा ह्येकनिकेतनाः ।
ते त्यजन्ति ततः स्थानं प्रतिलोम्यान्न वेतसः ॥२॥
वेतसो वेगमायातं दृष्ट्वा नमति नापरे ।
सरिद्वेगे व्यतिक्रान्ते स्थानमासाद्य तिष्ठति ॥३॥

१. **शब्दज्ञानम् ।** १

(i) चतुर्थपदं लिखत ।

अनुलोमः : प्रतिकूलः :: स्वीकुर्वन्ति : ........ ।

(ii) समूहेतरपदं लिखत ।

सरित्, नदी, निर्झरः, तटिनी ।

२. **पृथक्करणम् ।** २

(यथास्थानं तिष्ठन्ति, नमति, स्थानम् आसाद्य तिष्ठति, ततः स्थानं त्यजन्ति)

**वेतसः** ⟶ ☐ → ☐

**वृक्षाः** ⟶ ☐ → ☐

**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

ज्ञानतेजसो महान् निधिस्त्वं दयाघनस्त्वं तपोनिधिस्त्वम् ।
अनिशं शिष्यहितस्य चिन्तनं गुरुचरणाभ्यां सदा वन्दनम् ॥१॥
कुम्भकारस्त्वं मृत्तिका अहं मूर्तिकारस्त्वं पाषाणोऽहम् ।
तव हस्ताभ्यां मम निर्माणं कदापि मा भूत् ते विस्मरणम् ॥२॥
शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहताश्च नितरां सुहता भवन्ति ।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकम्
प्रज्ञा कुलं च विभवं च यशश्च हन्ति ॥३॥

**१. अवबोधनम् ।**

पूर्णवाक्येन उत्तरत । १

प्रज्ञा पुरुषस्य किं किं निहन्ति ?

**२. तात्पर्यलेखनम् / स्पष्टीकरणम् ।** २

प्रथमश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**

**श्लोकपूर्तिं कुरुत । (केवलं १ श्लोकः लेखनीयः ।)** २

**सुभाषितं शुद्धं पूर्णं च लिखत ।**

(i) शस्त्रैर्हतास्तु ....... हन्ति ॥

(ii) अतिथिर्बालकः ....... स्वशक्तितः ॥

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | | |
|---|---|---|
| (i) | पित्तं यदि शर्करया | स्वयं वित्तमुपार्जितम् । |
| (ii) | रसायनमिव प्राज्ञैः | तत्र दण्डो बुधेन विनियोज्यः । |
| (iii) | साम्नैव यत्र सिद्धिर्न | हेलया न कदाचन । |
| (iv) | शनैः शनैश्च भोक्तव्यम् | शाम्यति कोऽर्थः पटोलेन । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | प्रथमा बहुवचन | सप्तमी एकवचन | षष्ठी द्विवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(शाखायाम्, वयम्, शशिनोः, तस्मिन्, दिशः, तयोः)

आ) **क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| विध्यर्थः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः | वर्तमानकालः | परोक्षः भूतकालः | आज्ञार्थः |
|---|---|---|---|---|---|
| | | | | | |

(यच्छतु, पास्यति, अपिबत्, पीडयेत्, रोचते, जगाम)

इ) **समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**समस्तपदानां समासनामभिः सह मेलनं कुरुत ।**

| | **समस्तपदम्** | **समासनाम** |
|---|---|---|
| (i) | लोकप्रियः | बहुव्रीहि समास |
| (ii) | वैधाचारः | नञ् तत्पुरुष समास |
| (iii) | अल्पसारः | सप्तमी तत्पुरुष समास |
| (iv) | अवर्णनीया | षष्ठी तत्पुरुष समास |
| (v) | साशङ्कम् | कर्मधारय समास |
| (vi) | मूलशाखान् | अव्ययीभाव समास |
| | | इतरेतर द्वन्द्व समास |

ई) **उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) ...... विना जीवनं व्यर्थम् । (शिक्षणं / शिक्षणे / शिक्षणस्य)

(ii) मातामही प्रतिसोमवासरं ...... गच्छति । (शिवमन्दिरे / शिवमन्दिरं / शिवमन्दिरस्य)

(iii) एष क्रीडाप्रकारः ...... कृतेऽपि प्रचलितोऽस्ति । (महिलानाम् / महिलासु / महिला)

(iv) ...... दूरं पाठशाला अस्ति । (ग्रामस्य / ग्रामे / ग्रामात्)

(v) ...... सह सीता वनम् अगच्छत् । (रामात् / रामः / रामेण)

(vi) ...... समीपे आम्रवृक्षः अस्ति । (कूपे / कूपस्य / कूपम्)

उ) **रिक्तस्थानपूर्तिं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) जानास्येव = ...... + एव । (ii) मूर्ध्नोऽस्य = ...... + अस्य ।

(iii) ...... = उभौ + अपि । (iv) ...... = काश्चित् + च ।

(v) बहिस्तिष्ठन्ति = बहिः + ...... । (vi) अतिथिर्बालकः = अतिथिः + ...... ।

ऊ) **सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) साधुः ......... उटजे निवसति स्म । (१)

(ii) पाण्डवाः ......... आसन् । (५)

(iii) ......... मित्रयोः न्यायशास्त्रं प्रियमासीत् । (२)

(iv) मार्गे ......... वाहनानि सन्ति । (४)

(v) मम मातामही दिनस्य ......... औषधं सेवते । (दोनदा)

(vi) शाकुन्तलस्य ......... अङ्कः अतीव सुन्दरः अस्ति । (चौथा)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| शिशुः | पाठं | पिबति |
| छात्रः | नृत्यं | खादति |
| अश्वः | दुग्धं | करोति |
| बालिका | चणकान् | पठति |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

'लोके न किम् अशक्यं नाम' इति कोऽपि विदेशीयो महापुरुषः प्राह । 'अशक्यम्' इति एतत् पदं ........ कोशे लभ्यते, इति अन्य कश्चन महापुरुषः। 'अशक्यमपि शक्यं भवति प्रयत्नात्' इति एकस्य सत्पुरुषस्य सुभाषितम्। अतो ........ प्रयत्न एव सततं कर्तव्यः। आलस्यं सर्वथा विनाशाय कल्पते। आलस्येन गतं प्रदीर्घमपि जीवितं न........ । महान्तोऽपि गुणाः निष्फलाः यदि ते न उपयुज्यन्ते । यः सर्वं कालं ........ नयति स खलु मृत एव मन्तव्यः।

( निद्रया, जीवितम्, मूर्खाणामेव, मानवेन)

**Best of Luck**